# Shri Parvati Ashtottarashatanama Stotram

# શ્રીપાર્વત્યષ્ટોત્તરશતનામસ્તોત્રમ્

## Document Information

Text title : Shri Parvati Ashtottarashatanama Stotram

File name : pArvatyaShTottarashatanAmastotram.itx

Category : devii, aShTottarashatanAma, devI

Location : doc_devii

Transliterated by : PSA Easwaran

Proofread by : PSA Easwaran

Description/comments : See corresponding Namavali

Latest update : January 18, 2020

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

May 31, 2020

*sanskritdocuments.org*

# શ્રીપાર્વત્યષ્ટોત્તરશતનામસ્તોત્રમ્

મહેશ્વરી મહાદેવી મહેશ્વરવિમોહિની ।
મહાપ્રભા મહામાયા મહાસુરનિષૂદની ॥ ૧॥

ઉમા કુમારજનની હિમાચલતનૂભવા ।
ભવાની ભાવનાગમ્યા ભવપાશવિમોચિની ॥ ૨॥

શિવા ભવાઙ્કનિલયા મૃગાઙ્કસદૃશાનના ।
અપઙ્કા શઙ્કરી શાન્તા હૃદયાન્તઃપ્રકાશિની ॥ ૩॥

વિજયા દુર્જયામેયા જયદા જગદીશ્વરી ।
આર્યા પરાપરમયી ત્રિપુરા પરમેશ્વરી ॥ ૪॥

કાત્યાયની હૈમવતી શામ્ભવી સુમ્ભમર્દિની ।
શાકમ્ભરી કલા કાલિ ભૈરવી ભયહારિણી ॥ ૫॥

નારાયણી પ્રાણમયી શર્વાણી સર્વમઙ્ગલા ।
અરુણા ભૂરિકરુણા શરણાગતવત્સલા ॥ ૬॥

હરિણાઙ્કકલાભૂષા હરિણાક્ષા હરપ્રિયા ।
ભક્તપ્રિયા ભગવતી સુદયા દનુજાદયા ॥ ૭॥

પઙ્કજાક્ષસમારાધ્યા પઙ્કજાક્ષસહોદરી ।
કિઙ્કરીભૂતગીર્વાણા પઙ્કજાસ્ત્રોદ્ભવેક્ષણા ॥ ૮॥

હ્રીઙ્કારી શબરી તારા માતઙ્ગી મઙ્ગલપ્રદા ।
અઙ્ગીકૃતહરાર્દ્ધાઙ્ગા શૃઙ્ગારશરણાનના ॥ ૯॥

શૃઙ્ગારનાયિકા બાલા જયા સિંહાસનેશ્વરી ।
કામેશ્વરી ચ કલ્યાણી સુન્દરી સુરસેવિતા ॥ ૧૦॥

ચક્રેશ્વરી મધુમતી પાર્વતી પદ્મલોચના ।
કોદણ્ડિની કુણ્ડલિની ચામુણ્ડા ચણ્ડિકામ્બિકા ॥ ૧૧॥

ચર્ચ્ચિકા ગિરિજા દુર્ગા સર્ગસ્થિત્યન્તકારિણી ।
સુભગા લલિતા ગૌરી માતામણિર્ગૃહેશ્વરી ॥ ૧૨॥

લોકેશ્વરી મહારાજ્ઞી માલિની મેનકાત્મજા ।
રુદ્રાણી શઙ્કરી શર્મદાયિની સર્વસાક્ષિણી ॥ ૧૩॥

શ્રીવિદ્યા શ્રીકરી શક્તિષ્ષોડશી શ્રીદિપૂજિતા ।
વાગ્વાદિની વિન્દુગૃહા ભવસઙ્કટહારણી ॥ ૧૪॥

કરપઙ્કજસંસ્પર્શપ્રધૂતસુરશાસના ।
પાદપલ્લવનિષ્પિષ્ટમહિષાસુરવિગ્રહા ॥ ૧૫॥

તરુણાર્કસહસ્રાભતનુચ્છાયાવિજૃમ્ભણા ।
વદનામોદબિભ્રામ્યદલિપાલિનિભાલકા ॥ ૧૬॥

નવકુઙ્કુમકસ્તૂરીતિલકાલઙ્કૃતાલિકા ।
અધરારુણિમારક્તમુક્તાશોભિતનાસિકા ॥ ૧૭॥

કનત્કપોલયુગલપ્રતિબિમ્બિતકુણ્ડલા ।
તમઃપ્રવાહપ્રતિમચિકુરભ્રાજિદિઙ્મુખા ॥ ૧૮॥

ઇદમષ્ટોત્તરશતં પાર્વત્યાસ્સર્વકામદમ્ ।
સર્વસમ્પત્પ્રદં શ્રેષ્ઠં સર્વસૌભાગ્યપુષ્ટિદમ્ ॥ ૧૯॥

સર્વવિદ્યાપ્રદં સર્વપુરુષાર્થપ્રદં પરમ્ ।
રહસ્યમિદમુત્કૃષ્ટં ન મીમાંસમિતસ્તતઃ ॥ ૨૦॥

યઃ પઠેત્પરયા ભક્ત્યા સન્ધ્યાકાલે સમાહિતઃ ।
સ્મરન્નપિ મહાદેવં પાર્વતીસહિતં શિવમ્ ।
સ ભુક્ત્વાત્ર મહાભોગાન્ શિવલોકે મહીયતે ॥ ૨૧॥

ઇતિ પાર્વત્યષ્ટોત્તરશતં સમ્પૂર્ણમ્ ।

Encoded and proofread by PSA Easwaran

*Shri Parvati Ashtottarashatanama Stotram*

pdf was typeset on May 31, 2020

Please send corrections to *sanskrit@cheerful.com*